# पादमूर्त्तिमयं स्तोत्रपञ्चकम्

अमृत पटेलः

परमपूज्य काव्यमर्मज्ञ विद्वद्वर्य मुनिवर श्रीधुरन्धरविजयजी पासेथी प्राप्त थयेल हस्तप्रतोनी झेरोक्ष कोपीने आधारे प्रस्तुत पादपूर्ति स्तोत्रोनुं सम्पादन थयुं छे. तेमां रघुवंश महाकाव्य, भक्तामरस्तोत्र, "संसारदावा०" स्तुति तथा "आनन्दानम्र"० स्तुतिनां अलग अलग चरणनी पूर्तिरूपे आ स्तोत्रो रचायां छे. प्रस्तुत स्तोत्रोना उपजीव्य साहित्यना ऐतिहासिक क्रमने मुख्य मानीने, सम्पादनमां-सौ प्रथम रघुवंशपादपूर्तिरूप (१) श्री ऋषभदेव स्तोत्र (२) श्रीवीतरागस्तोत्र, (३) भक्तामर स्तोत्रनां प्रथमपादनी पूर्तिरूप श्री ऋषभदेवस्तोत्र (४) 'संसारदावा'. स्तुतिनी पादपूर्तिरूप महावीरजिनस्तोत्र (५) 'आनन्दानम्र'. स्तुतिनी पादपूर्तिरूप श्रीशान्तिजिन स्तोत्र-क्रम राख्यो छे. परंतु पादपूर्तिकारोना समयानुसारे नहीं.

प्रतिपरिचय - पांचेय स्तोत्रो लालभाई दलपतभाई भारतीय विद्यामन्दिर अमदावादनां हस्तप्रतभण्डारनी हस्तप्रतोनी झेरोक्षकोपीओ रूपे छे. 'रघुवंशपादपूर्तिस्तोत्रो (१,२)नी ह.प्र. नंबर-ला.द.भे.सू. २२२५६ छे. ते पंचपाठ छे, (३) भक्ता. पा. स्तोत्रनी ह.प्र.-ला.द.भे.सू. ३००५० छे. अक्षर सुवाच्य अने सुन्दर छे. (४) संसारदावा० पा. स्तोत्रनी ह.प्र. ला.द. भे. सू ४१-१० छे. पं. दानसारगणिअे वि.सं. १५६३मां लखी छे. (५) 'आनन्दानम्र' पा. स्तोत्रनी ह.प्र.-ला.द. भे.सू. २९९९७ छे. बधी प्रतोनां बे-बे पत्रो छे.

पांचमांथी मात्र 'संसारदावा[१]' पादपूर्तिस्तोत्रनो ज उल्लेख मळे छे. अने ते पण अछडतो ज. बाकीनां स्तोत्रोनो उल्लेख मळतो नथी. सम्पादनमां भक्ता पा. स्तोत्रनी टिप्पणी जरूर मुजब आपी छे.

रघुवंश पा.स्तोत्रमां प्रत्येक पाद पछी ( )मां रघुवंशना सर्ग-श्लोक अने चरणनो अंक शोधीने अंग्रेजीमां आपेल छे, परंतु (१) ऋषभ देवस्तोत्रमां १८मा पद्यमां अने (२) वीतरागस्तोत्रमां २जा पद्यमां Bनुं स्थान मळ्युं नथी.

**स्तोत्र/स्तोत्रकार**-रघुवंश महाकाव्य बधा सर्गमांथी भिन्न भिन्न पद्योनां बे-बे चरणो लईने पादपूर्तिरूप ऋषभदेव स्तोत्र अने एज महाकाव्यनां प्रथम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्गनां भिन्न-भिन्न पद्योमांथी त्रण त्रण चरणो लईने श्रीवीतरागस्तोत्रनी रचना थई छे. तेमां रघुवंशनां ते ते पदोनां वर्ण्य विषयने बदले श्रीऋषभदेव तथा श्रीवीतरागपरमात्मानां सन्दर्भमां अर्थघटन अवचूरि द्वारा रजू थयेल छे. स्तोत्रकार (श्री संघहर्ष-धर्मसिंह शिष्य) मुनिराज श्रीरत्नसिंह (१८मो विक्रमशतक पूर्वार्ध) पादपूर्तिकार तरीके प्रस्थापित छे. तेमणे भक्तामरस्तोत्रनां चतुर्थ चरणने आधारे "प्राणप्रियं नृपसुतः"थी शरु थतुं नेमिभक्तामर (लेखन संवत् [२]१७३०)नी रचना करी छे.

भक्तामरस्तोत्र (विक्रम ७मो शतक)ना प्रथमचरणनी पादपूर्तिरूप श्रीऋषभदेवस्तोत्र, भक्ता.पा.स्तोत्रो (२४)[३]मां सम्भवतः प्राचीनतम छे. कारण के विक्रमसंवत् १६८०मां लिपिकृत 'भक्ता.पा.स्तोत्र जे समयसुन्दरकृत छे, तेनो ज भक्ता.पा.स्तोत्रोमां सौथी प्रथम उल्लेख छे. ज्यारे प्रस्तुत भक्ता.पा.स्तोत्रना कर्ता पं. महीसागर गणिनो समय विक्रमना १६मा शतकना पूर्वार्धनो छे. प्रस्तुत स्तोत्रमां अन्तिम पद्यमां तपा. लक्ष्मीसागरसूरिनो उल्लेख छे, ते (वि.सं. १४६४-१५४१) प्रभावक आचार्य हता. अेमणे ६ वर्षनी लघुवयमां वि.सं. १४७०-उदयपुरमां मुनिसुन्दरसूरि पासे प्रव्रज्या[४] स्वीकारी हती. लक्ष्मीसागरसूरि-सन्तानीय सोमजयसूरिअे (प्रायः १५२५-१५३३) अमदावादमां महीसमुद्र तथा लब्धिसमुद्र, अमरनन्दि अने जिनमाणिक्यने वाचकपद आप्युं हतुं, पण्डित महीसमुद्र पण्डितपदनी प्राप्ति पछी स्तोत्रनी रचना करी हशे.

संसारदावा० पा.स्तोत्र अने 'आनन्दानम्र०' पा.स्तोत्रनां कर्ता ज्ञानसागर-सूरि छे. बे ज्ञानसागरसूरिनी माहिती उपलब्ध छे. (१) तपा. देवसुन्दरसूरिशिष्य (२) बृ.त. रत्नसिंहसूरिशिष्य.

(१) चन्द्रगच्छीय सोमतिलकसूरि-शिष्य देवसुन्दरसूरिना ज्ञानसागरसूरि शिष्य हता. ज्ञानसागरसूरिअे वि.सं.१४४०मां आवश्यक अवचूर्णि, १४४१मां उत्तराध्ययन अवचूरि अने ओघनिर्युक्ति अवचूर्णिनी रचना करी छे. तथा मुनिसुव्रतस्तव, घनौघ नवखण्डपार्श्वनाथस्तवन वगेरे स्तोत्रोनी पण रचना करी छे.

(२) सैद्धान्तिक मुनिचन्द्रसूरिना शिष्य बृ.त.रत्नसिंहसूरिना शिष्य ज्ञानसागरसूरिअे वि.सं. १५१७[५]मां स्तम्भतीर्थमां विमलनाथचरित्रनी रचना करी छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवसुन्दरसूरि अने रत्नसिंहसूरिनो शिष्यगण विद्वान छे. बन्नेनो समय जोके लगभग समान शतकमां छे, परंतु प्रस्तुत स्तोत्रना कर्ता ज्ञानसागरसूरि अे देवसुन्दरसूरिनां शिष्य होवा वधु सम्भव छे. कारण के रत्नसिंह-शिष्य करतां देवसुन्दरसूरि-शिष्य वधु प्राचीन छे. तथा स्तोत्र, अवचूर्णि वगेरे ग्रन्थो एमनी रचनाओ छे. रत्नसिंहसूरिशिष्य ज्ञानसागरसूरिजीना नामे मात्र विमलनाथ चरित्र छे. छतां 'विमलनाथ चरित्र' जोईने निर्णय करवो योग्य छे.

संसारदावा.अने वीतरागस्तोत्र आ बन्ने स्तोत्रोमां मात्र कर्तानां सांकेतिकनामो - 'ज्ञानाम्भःसागराभः' तथा 'श्रीज्ञानसिन्धुः' छे. साक्षात् नामो नथी अने गुरुनाम पण नथी. तथा बन्ने स्तोत्रोना कर्ता कोण ? एक ज ज्ञानसागरसूरि के अलग अलग ज्ञानसागरसूरि ? आ बाबतमां बन्ने स्तोत्रोना आन्तरसम्बन्ध खास करीने स्रग्धराछन्दना पद्यमां केटलीक समानता बन्ने स्तोत्रोना कर्ता एक ज होवा विषे संकेत करे छे. जेमके बन्ने स्तोत्रोमां रचना प्रौढ छे. तथा संसार०पा.स्तोत्रनुं १३मुं पद्य तथा आनन्दा०पा.स्तोत्रनुं १५मुं पद्य, संसार०पा.स्तोत्रनुं १४ मुं पद्य तथा आनन्दा०पा.स्तोत्रनुं ४थुं पद्य, रचनानी केटलीक समानता धरावे छे. पोतानां उपजीव्य मुजब 'आनन्दा' पा.स्तोत्रमां ओजसगुणनी प्रौढि छे. तो 'संसारदावा'. पा. स्तोत्रमां प्रासादिकता छे. बन्नेमां तीर्थंकरनां शरीरनी उंचाई माटे एक ज शब्द 'प्रमिततनुः' छे.

लाञ्छन माटे पण 'एक ज शब्द 'अङ्कः' छे, अन्तिम पद्योमां एवं शब्द छे, पोतानुं नाम संकेतमां अपायुं छे. माटे बन्ने स्तोत्रोना कर्ता एक ज होवा वधु सम्भव छे. अने ते देवसुन्दरसूरिशिष्य होवा जोईअे.

—x—

**टिप्पणी :**

१. (४) 'संसारदावा. पूर्ति- आना कर्ता ज्ञानसागर छे' (ही.र.कापडिया जैन संस्कृत साहित्यनो इतिहास. खंड २, पृष्ठ २५८, सम्पा. आ. श्री मुनिचन्द्र सूरिजी ई.स. २००४)

२. (४) नेमिभक्तामर, एजन, पृ. २६४

३. भक्तामरपादपूर्तिरूप काव्यो, एजन, पृ. २५३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

४. गुरुगुणरत्नाकर, जै.साहित्यनो संक्षिप्त इतिहास, मो.द.देसाई सं. आ.श्री मुनिचन्द्रसूरि, ई.स. २००६, पेरा ७ मो, पृ. ३२७

५. "इति श्रीऋषभदेवस्तोत्रं श्री पण्डितमहीसमुद्रगणिपादविरचितम्" ला.द. भे. सू. ३००५० नी झेरोक्ष कोपी.

७. स्तम्भतीर्थमां शाणराजे वि.सं. १५०८ मां विमलजिनप्रासाद बंधाव्यो. श्रीरत्नसिंह सूरिए प्रतिष्ठा करावी. वि.सं. १५१७ मां शाणराजे विनंती करवाथी विमलनाथ चरित्रनी रचना करी-विमलनाथ चरित्र भाषांतर, मो.द. देसाई, जै.सा.नो संक्षिप्त इतिहास सं. आ.श्री मुनिचन्द्रसूरि. ई.स. २००६, पेरा ७१९.

---

## रघुवंशपदद्वयसमस्यानिबद्धं युगादिजिनस्तवनम्, तदवचूरिश्च

[1]अथाभ्यर्च्य विधातारं[2], शर्मण[3]स्त्वत्पदाम्बुजम् । [A 1-25-1]
स्निग्धग[4]म्भीरनिर्घोषं रचयामि तव स्तवम् ॥१॥ [B 1-35-2)
अथः[5] प्र[6]जानामधिपः प्रभाते । [A 2-1-1]
यस्ते सपर्यां विधिवत् तनोति ॥
एका[7]तपत्रं जगतः प्रभुत्वं
प्राप्नोत्यावद्भुतभाग्यसिन्धुः(?) ॥२॥
निदा[8]नमिक्ष्वाकुकुलस्य सन्तते- [A 3-1-1]
र्यस्त्वां नयेद् दृष्टिपथं गरिष्ठधीः ॥
दि[9]नेषु गच्छत्सु नितान्तपीवरं [B 3-8-1]
श्रेयो निवासं विदधाति तद्गृहे ॥३॥
स्तु[10]त्यं स्तुतिभि[11]रर्थ्याभि-र्यस्त्वां स्तौति प्रशस्तगीः ॥ [A 4-6-3]
स हि सर्वस्य लोकस्य मान्यतामेति मानवः ॥४॥ [B 4-8-1]
क[13]ल्येन वाचा मनसा च शश्वत् [A 4-4-1]
प्रभोरुपास्ति तव यस्तनोति ॥
का[14]लोपपन्नातिथिभागधेयं
तन्मन्यिरे न क्षयमेति पृक्[15]तम् ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परा[16]ध्यवर्णा[17]स्तरणोपपन्नं [A 6-4-1]
न के श्रयन्ते भविनो भवन्तम् ॥
तं प्राप्य सर्वावयवानवद्यं [B 6-69-1]
यदीशो[18]ऽहं जिन ! का गतिर्मे(?) ॥६॥
[19]उद्भासितं मङ्गलसंविधाभिः [A 7-16-3]
स्वर्गं समासाद्य सुखानि भुङ्क्ते ॥
महार्हसिंहासनसंस्थितोऽसौ [B 7-18-1]
क्रमाच्छिवं याति तवार्चनेन ॥७॥
अ[20]नपायपदोपलब्धये [A 8-17-1]
हृदा(दि) ये त्वां दधते पुरा[21]विदः ॥
भगवन् ! पर[22]वानयं जनो [B 8-81-2]
भवभोगैकरतिः करोमि किम् ॥८॥
प्रौढप्रियानयनविभ्रमचेष्टितानि [A 9-58-4]
ध्यानानि चेतसि तवापि पुरःस्थितेन ॥
प्रो[23]वाच[24] ! कोशल[25]पतिप्रथमापराधः [B 1-19-4]
क्षन्तव्य एष करुणाम्बुनिधिर्यतोऽसि ॥९॥
किञ्चि[26]दूनमनूनर्द्धे ! स्वामिन्नद्यापि वर्त्तते ॥ [A 10-1-3]
उदधेरिव रत्नानि त्रीणि[27] प्राप्तानि यत् प्रभोः ॥१०॥ [B 10-30-7]
[28]गन्धवद् रुधिरचन्दनोक्षितां [A 11-20-3]
मूर्तिमीश ! तव पश्यतां नृणाम् ॥
पक्ष्मपातमपि वञ्चनां मनो [B 11-36-4]
मन्यते नलि[29]ननेत्र ! नेत्रयोः ॥११॥
सा पौरान् पौरकान्तस्य पुनाति तव गीरियम् ॥ [A 12-3-3]
नभो-न[30]भस्ययोर्वृष्टिं या जिगाय त्वदीरिता ॥१२॥ [B 12-29-3]
से[31]वाविचक्षणहरीश्वर ! दत्तहस्त !
श्रेयोऽर्पणे सुकृति[32]नां शरणं श्रये ते ॥
इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य [B 13-70-1]
तुभ्यं विभो ! परमहं नु[33] भजामि किञ्चित् ॥१३॥
वि[34]पाकविस्फूर्जथुरप्रसह्यः [A 14-62-4]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वकर्मणां शर्मद ! किं करोमि ॥
सम्पत्स्यते ते मनसः प्रसादो [B 14-76-4]
यदा तदा सिद्धिसुखं न दूरे ॥१४॥
[35]कृतशीतापरित्यागस्तापोऽपि न विरागवान् ॥ [A 15-1-1]
आदिष्टवर्त्मा मुनिभिः कदा त्वच्चरणं श्रये ॥१५॥ [B 15-10-1]
पुरः परा[36]ध्य प्रतिमाऽगृहा[37]या [A 16-39-2]
स्थितस्य याते मम नाथ ! तुष्टिः ॥
सा म[38]न्दुरा संश्रयिभिस्तुरङ्गै-
र्गजैर्नवा वारिविहारवद्भिः ॥१६॥
दुरितं दर्शनेन घ्नन् वन्दनेनेहितप्रदः ॥ [A 17-74-1]
दूरापवर्जितच्छत्रैः सुरेन्द्रैस्त्वमुपास्यसे ॥१७॥ [B 17-19-1]
दमान्वितः पद्मदलाभदृष्टि- [A ?]
र्गुणाम्बुनिधिर्बुद्धिनिधिर्विधिज्ञः ॥
पतिः पृथिव्याः कुलकैरवेन्दु- [B ?]
र्युगादिनाथो जयताज्जिनेन्द्रः ॥१८॥
एवमिन्द्रियसुखानि निर्विश- [19-47-1]
न्नप्यधीश्वरनुतिं तनोति यः ॥
तं प्रमत्तमपि न प्रभा[39]वतो [B 19-48-3]
दुर्णतिः स्पृशति सा[40]तमेति च ॥१९॥
**श्रीसङ्घहर्ष**सुविनेय[क]**धर्मसिंह**-
पादारविन्दमधुलिण्**मुनिरत्नसिंहः** ।
श्री[41]मद्युगादिजिनवर्णनवर्ण्यवर्णं
स्तोत्रं चकार **रघुवंश**पदप्रधानम् ॥२०॥

—x—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## रघुवंशपदत्रयसमस्यानिबद्धं

## श्रीवीतरागस्तवनम्

रघुवंशादिसर्गस्य पदत्रयसमस्यया ।
कुर्वे स्तोत्रं जगद्भर्तुः समीहितफलप्रदम् ॥१॥

लो[1]कान्तरसुखं पुण्यं स्मृत्वा सपदि सत्वरः । [A 1-69-1]
A B [B ?]
स्निग्धगम्भीरनिर्घोषं वितनोमि विभोः स्तवम् ॥२॥ [C 1-36-1]
C

भीम[2]कान्तैर्नृप[3] ! गुणैस्तनु[4]र्वाग्विभवोऽपि सन् । [A 1-16-1
A B B 1-9-2]
आ[5]त्मकर्मक्षमं देहं स्तवं कृत्वा पुनाम्यहम् ॥३॥ [C 1-13-3]
C

अनिन्द्या नन्दिनी नाम[6] वा[7]गर्थप्रतिपत्तये । [A 1-82-3
A B B 1-1-2]
तव मन्त्रकृ[8]तो मन्त्रै-र्दुःसाधैरलमेव च ॥४॥ [A 1-61-1]
C

सो[9]हमिज्याविशुद्धात्मा प्रार्थनासिद्धिशंसिनः । [A 1-68-1]
A B B 1-42-3]
तितीर्षुर्दुस्तरं मोदा-[10]पगमात् ते श्रये क्रमौ ॥५॥ [C 1-2-3]
C

आ[12]समुद्रक्षितीशानां माननीयो मनीषिणाम् । [A 1-5-1]
A B [B 1-12-2]
अ[13]दूरवर्त्तिनीं सिद्धिं विधेहि भगवन् ! मम ॥६॥ [A 1-87-1]
C

सरसीष्वरविन्दानां यथा[15] काल[17]प्रबोधिनाम् । [A 1-43-1]
A C B 1-6-4]
सो[14]हमाजन्म[16]शुद्धानां ग[17]म्योऽसि [18]ज्ञानभास्करः ॥७॥ [C 1-5-1]
C

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[20]सर्वातिरिक्तसारेण विद्यानां पारदृश्वनः । [A 1-42-2]
A C B 1-23-2]
आदेशं देशकालज्ञः मौलौ बिभ्रति ते प्रभो ! ॥८॥ [C 1-92-3]
C

ज्ञाने मौनं क्षमा शक्तौ द्वयमेवार्थसाधनम् । [A 1-22-1]
A C B 1-19-2]
अनुभावविशेषात् तु त्वग्ये वास्त्यपरे नहि[21] ?॥९॥ [A 1-37-3]
C

आकारसदृशप्रज्ञ परत्रेह च शर्मणे । [A 1-15-1]
A B B 1-69-4]
उपस्थितेयं कल्[22]याणी-भक्तिर्मनसि ते सताम् ॥१०॥ [A 1-87-3]
C

तयां[23]हीनं विधातर्मा प्रारम्भसदृशोदयम् । [A 1-70-1]
A B B 1-15-4]
असह्यपीडं भगवन् ! नवकर्मकदर्थितम् ॥११॥ [C 1-11-1]
C

नमामवति सद्वीपा रत्नसूरपि मेदिनी ॥ [A 1-91-1]
A B B 1-65-2]
अनाकृष्टस्य विषयैर्बोधिर्मेऽस्तु भवे भवे ॥१२॥ [A 1-23-1]
C

इत्याप्रसादा[24]दस्यास्त्वं परिचर्यापरो भव । [A 1-91-1]
A B B 1-91-2]
अविघ्नमस्तु ते भूयाः रे जीव ! शिवसौख्यभाक् ॥१३॥ [C 1-92-3]
C

श्री**सङ्घहर्ष** सुविनेयक **धर्मसिंह**-
पादारविन्दमधुलिण्मुनि**रत्नसिंहः** ।
श्रीमज्जिनेन्द्रगुणवर्णनवर्ण्यवर्णं
स्तोत्रं चकार **रघुवंश**पदप्रधानम् ॥१४॥

इति श्रीरघुवंशपदत्रयसमस्यानिबद्धं श्रीवीतरागस्तवनम् ॥

—x—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महीसमुद्रगणिरचितं

# 'भक्तामर 'पादपूर्तिमयं

## आदिजिनस्तोत्रम्

भक्तामरप्रभुशिरोमणिमौलिमाला-
मन्दारसारमकरन्दकदम्बकार्च्यौ ।
नाभेयदेव ! [१]भवतो भवदीयपादा-
वालम्बनं भवजले पततां जनानाम् ॥१॥
यस्य स्तुतिर्मतिमतामपि गोचरः स्या-
न्नो योगिनां गुणमहागरिमाऽमराद्रेः ॥
शालीनताऽतिमहतीयमहो यदेषा
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥२॥
त्वामेव देवमपसन्तमसं श्रयन्ते
सन्तः कषायकलुषानपरानुपेक्ष्य ॥
काचं विमुच्य मणिमात्महिताय विज्ञं-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥३॥
शक्नोति नो तव जिन! स्तवनाय धीर-
धीमान् पुमान् क इह मन्दमतिस्तु मादृग् ॥
पद्भ्यां हि गन्तुमगशृङ्गमिवाङ्ग[२] ! पङ्गुः
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥४॥
देव ! त्वदेकशरणं करुणागुणाब्धे !
मामीश ! मोचय महारिपुमोहरुद्धम् ॥
कष्टे कलिव्यसनतः [३]सविता समर्थो
नाभ्येति किं निजशिशोः परिपालनार्थम् ॥५॥
ग्रन्थिं विभिद्य जिन ! मोहमयं बभूव
त्वद्दर्शने रुचिरसौ शिवसौख्यहेतुः ॥
मूलेषु यत् परिणमत्युदकं घनस्य
तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाह्यान्तरारिबलमप्यखिलं विशालं
त्वद्ध्यानसन्निधिविधायिधियामधीश ! ॥
भूरिप्रभाव ! भजते विशरारुभावं
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥
त्वत्पादपङ्कजयुगप्रणिधानयोगा-
न्नाभेय ! नाशमुपयाति महान्त्यघानि ॥
वातोद्धुतः किल कियच्चिरमब्जपत्रे
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥
लक्ष्मीविलासवसतिं विदुरा विदन्तु
नामैव ते स्मरणतोऽस्य यदाप्यते श्रीः ॥
मिथ्येन्दुमण्डलमथातपवारणं वा
पद्माकरेषु जलजानि विकाशभाञ्जि ॥९॥
त्वांमष्टकर्ममलमुक्तमुपास्य नष्ट-
कर्माष्टको हि भजतीति भजे भवन्तम् ॥
किं सर्वतोमुखसुखैषिभिरिष्यते स
भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥
श्रोतुं सुराः समुपयन्ति गिरं गुरो ! ते
देवेश ! दिव्यमपि गीतरसं निरस्य ॥
स्वाधीनसौधरससारसराः पिपासुः
क्षारं जलं जलनिधेरसितुं क इच्छेत् ॥११॥
उत्पाद्यते कथमधीश ! तवात्मतत्त्व-
मर्वाग्दृशामनुपमानमतीन्द्रियं च ॥
आलोकितं क्वचिदपि श्रुतपूर्वकं वा
यत्ते समानमपरं नहि रूपमस्ति ॥१२॥
वागौचितीं व्रजति सा किमु कोविदानां
यत् ते त्वदीययशसामतिनिर्मलानाम् ॥
नेतस् ! तदप्युपमयन्ति शशाङ्कबिम्बं
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोधं निरुध्य परिमथ्य मदं निहत्य
मोहं प्रमुष्य निखिलानपि शेषदोषान् ॥
ये त्वां श्रिताः शिवपथे पथिका जिनेन्द्र !
कस्तान्निवारयति सञ्चरतो यथेष्टम् ॥१४॥

कर्मक्षयोत्थमिह वीर्यमनन्तमर्हन् !
यादृक् तव त्रिभुवनेऽपि परस्य नेदृक् ॥
केनाप्यपश्चिमजिनेश्वरमन्तरेण
किं मन्दराद्रिशिखरं चलितं कदाचित् ॥१५॥

पूर्णः शशी निशि दिवा च दिवाकरः स्यात्
गेहे तथा गृहमणीति जगत्प्रतीतः ॥
दीपाः कियद् वियति दीप्तिकृतस्ततस्तु
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥

उद्बोधयन् कुमुदमभ्युदयेन नाना-
[10]पद्मालिकां मुकुलयंश्च तमोग्रहस्य ॥
ग्रासं विधंश्च(?) दधदातपवारणानि
सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥१७॥

यन्नित्यमस्तरहितं परिवर्धमान-
तेजश्च नैककलमुज्ज्वलमप्यखण्डम् ॥
जाग्रद् यशस्तव जिगाय जिनेन्द्रचन्द्र !
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥

यद्यस्ति नो भवति भक्तिरसस्तदानीं
न स्युस्सुदुस्तपतपांस्यपि सत्फलानि ॥
सञ्जायते सपदि बीजमृते[13] हि सस्य-
कार्यं कियज्जलधरैर्जलभारनम्रैः ॥१९॥

श्रुत्वा श्रुतोपनिषदं परदर्शनानां
त्व[च्छा]शने सुकृतिनः कति नो रमन्ते ॥
विद्वन्मनो मणिषु मोहमुपैति यद्वन्-
नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं विश्वमोहनमिमामुत कार्मणं ते
मूर्त्तिं किमुत्तमवशीकरणं वदामः ॥
नेतर्न यत् सकृदपीक्षितपूर्विणां तां
कश्चिन्मनो हरति नाथ ! भवान्तरेपि ॥२१॥
देवाः परेऽपि ददते दिविषत्सुखानि
शैवं त्वनन्तसुखमर्पयसि त्वमेकः ॥
कुर्यात् प्रतीच्यपि कवेरुदयं रवेस्तु
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥२२॥
ज्ञानक्रियाद्वयमयं यमपायमुक्त-
माख्यः[१४] सुखाश्रय ! महोदयमार्गमीश :
सर्वात्मसंयमवतां सुगमं वितानं
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥
त्वां शब्द-रूप-रस-गन्धगुणव्यपेतं
व्याघातवर्जितममूर्त्तमसङ्गमेकम् ॥
नानाभिधाभवदुपाधिभिदं न के के
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥
विश्वे विभो ! परममङ्गलमङ्गिनां त्वा-
मेकः शरण्यशरणं शरणार्थिनां च ॥
श्रीवीतराग ! विगतान्तरवैरिवार !
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥२५॥
शक्तिर्न मे तपसि नापि जपे पटुत्वं
ध्याने न धैर्यममलं च मनोऽपि नो मे ॥
किं त्वेकमेव भवतारणकारि कुर्वे
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥
नाद्यापि मे मतिरुपैति तवोपदेशे
प्रीतिं प्रयाति विषयेषु न यद् विरागम् ॥
मन्ये मया क्वचन पूर्वभवेषु तत् त्वं
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकस्थितिप्रथितपातकपार्श्ववर्त्ती(त्ति-)
निःशेषकर्मपटलापगमात् तवात्मा ॥
धत्ते महोऽधिकमहोभ्रमदभ्रमुक्तं
बिम्बं रवेरिव पयोधरपार्श्ववर्त्ति ॥२८॥
सिंहासने स्थितवतस्तव हेमरत्न-
रम्ये स्फुरत्युरु विशेषवतीव दीप्तिः ॥
प्रातः प्रभा प्रचुरधातुरसैरुपेता
तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥२९॥
नेतर्विभूषति भृशं भवदंसदेशं
हेमोपमं मरकतद्युतिकाऽलकाऽऽली ॥
कल्पद्रुकाननततिः परितः प्रकाम-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥
दोषत्रयीविजयिनं त्रिसुपर्वसाल-
संस्थं त्रिकालविदमीश ! भवन्तमाशु ॥
रत्नत्रयीगुरुगुणा नृपतित्रिशक्तिः[१५]
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥३१॥
अत्रोचितः कविकृतोऽस्त्युपमोपमेय-
भावो न वेदमवधारयितुं धरेयम् ॥
यत्रादधासि चरणौ तदधः सुवर्ण-
पद्मानि तत्र बिबुधाः परिकल्पयन्ति ॥३२॥
तीर्थाधिपत्यपदवी भुवनोपकार-
सारा यथा तव तथा न भवेत् परेषाम् ॥
सौख्यावहः सवितुरस्त्युदयस्तु यादृक्
तादृक् कुतो ग्रहगणस्य विकाशितोऽपि ॥३३॥
दुर्वार वैरि-करि-केसरि-वारि-मारि-
चौरोरगप्रभृतिसम्भवमाभवं ते ।
निःशेषभीतिहरणौ चरणौ शरण्यौ
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् तिष्ठति ग्रहगणस्तव पादपीठे
सेवापरो मुकुलिताग्रकरः स्वमौलौ ।
क्रूरोऽपि युक्तमिह स प्रतिकूलभावा-
न्नाऽऽक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥

भूयो भवभ्रमभवं श्रममङ्गभाजां
तृष्णाभवं परमनिर्वृतिनाशनं च ॥
अन्तः परीतमुपतापमलं मलं च
त्वन्नामकीर्त्तनजलं शमयत्यशेषम् ॥३६॥

नैवाहितः स्फुरति कोपि परोपतापो
मूर्च्छा च नो सविषया प्रकृताऽपकृत्या ।
नो भोगिभङ्गिजनिता विकृतिश्च तस्य
त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥

कल्याणकेषु भगवन् ! भवतः प्रभूतो-
द्भूतप्रभावविभवैर्यदि नारकाणाम् ॥
नश्यत्यशेषमसुखं तदिहोच्यते किं
त्वत्कीर्त्तनात् तम इवाशु भिदामुपैति ॥३८॥

सत्पुण्यचञ्चुचरिता गुणिपक्षदक्षाः
प्रीत्या परागरसरङ्गभृतो मरालीः ॥
गर्जद्गुणैः परमहंसपदं पृणन्त-
स्त्वद्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥

रुद्धा विरोधिभिरधीश ! धृती धरेशैः
बद्धाश्च बन्धनशतैश्चलिताश्च चौरैः ॥
प्राप्ता परं व्यसनमप्यभयं पदं हि
त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥४०॥

रूपं निरूपयितुमीश ! तदीशते ते
केऽनुत्तरा जगदनुत्तररूपिणोऽपि ॥
यस्याग्रतोऽञ्जनमिवापगताङ्गभासो-
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वन्नाममन्त्रमिव नाथ ! पवित्रपात्र -
मत्र श्रियामसममुक्तिकरं स्मरन्तः ॥
बाह्यान्तरद्विविधबन्धभृतोऽपि बाढं
सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२॥

तं सर्वतोमुखमुपैति सुखं समग्र-
श्रीभिः समं शमितदुर्मतिदुःस्थताभिः ॥
मन्त्रं महान्तमिव तत्र नियन्त्रितात्मा
यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥

यस्ते स्तुतिं प्रथमतीर्थपते ! प्रथीयः-
पुण्योदयां प्रथयति प्रथमानभावः ॥
**श्रीसूरसुन्दर**महामहसा लसन्तं
तं **मानतुङ्ग**मवशा समुपैति लक्ष्मीः ॥४४॥

इत्थं श्रीजिननाभिनन्दनविभो(भु)र्भक्त्यात्तभक्तामर-
स्तोत्रान्त्यांह्रिसमस्यया स्तुतपदः, स्तुत्याल्पमत्या मया ॥
तत्त्वातत्त्वपथप्रकाशनरवेर्माहात्म्यमालालसल्-
**लक्ष्मीसागरसार्वसोमजयदः** स्तादाक्षदिव्यो रयः(रथः) ॥४५॥

इति श्रीऋषभदेवस्तोत्रं श्रीपण्डित-
महीसमुद्रगणिपादविरचितम् ॥छ॥

★

### श्रीज्ञानसागरसूरि विनिर्मितं

## संसारदावा० पादपूर्त्तिमयं

## महावीरस्तोत्रम् ।

कल्याणवल्लीवनवारिवाहं
श्रेयःपुरीसत्पथसार्थवाहम् ॥
हर्षप्रकर्षेण नुवामि वीरं
संसारदावानलदाहनीरम् ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विभो ! जनास्ते जगति प्रधानाः
ये त्वां भजन्ते दलिताभिमानाः ।
सम्प्राप्तसंसारसमुद्रतीरं
सम्मोहधूलीहरणे समीरम् ॥२॥
केनाऽपि जिग्ये नहि मोह-भूपः
प्रकाममुद्दामतमःस्वरूपः ॥
विना भवन्तं भुवनैकवीरं
मायारसादारणसारसीरम् ॥३॥
सुवर्णसद्वर्णलसच्छरीरं
सिद्धार्थभूपालकुलाम्रकीरम् ।
औदार्य-धैर्यादिगुणैर्गभीरम्
नमामि वीरं गिरिसारधीरम् ॥४॥
अन्यां विहाय महिलां महिमाभिरामा
भेजे जिनेश ! भवता किल मुक्तिरामा ॥
कैवल्यनिर्मलरमासुषमानवेन
भावावनामसुरदानवमानवेन ॥५॥
सत्राकिनायकनिकायशिरांसि यानि
ब्रह्मादिदैवतगणेन मनाग् नतानि ॥
त्वत्पादनीरजरजः स्पृहयन्ति तानि
चूलाविलोलकमलावलिमालितानि ॥६॥
तापापहा भविकभृङ्गविराजमाना
मूर्त्तिस्तव प्रवरकल्पलतोपमाना ॥
दत्ते जगत्त्रयपते ! सुमनःसमूहैः
सम्पूरिताभिमतलोकसमीहितानि ॥७॥
येषामधो नवसुवर्णसमुद्भवानि
सञ्चारयन्ति विबुधा नवपङ्कजानि ॥
भूपावकानि रजसा किल तावकानि
कामं नमामि जिनराज ! पदानि तानि ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावत् तृष्णाकुलितमतयः पापतापोपगूढा
दुःखीयन्ते नवनवभव[वे]ग्रीष्मकाले कराले ॥
यावल्लोका घनमिव भवच्छासनं नो लभन्ते
बोधागाधं सुपदपदवीनीरपूराभिरामम् ॥९॥
पीयूषाभं तव सुवचनं वर्यमाधुर्ययुक्तं
स्वादं स्वादं विपुलहृदयक्षीरसिन्धोः समुत्थम् ॥
क्षारं नीरं कुसमयमयं कामयन्ते न भव्या
जीवा हिंसा विरललहरीसङ्गमागाहदेहम् ॥१०॥
निःपुण्यानां न सुलभमिह श्रीमदानन्दहेतुं
विज्ञैर्धन्यैस्तव जिनपते ! शास्त्ररूपं निधानम् ॥
चित्ताऽऽवासे लसदचलना निर्जिताऽमर्त्यभूभृच्-
चूलावेलं गुरुगममणीसङ्कुलं दूरपारम् ॥११॥
अव्याबाधास्स्सपदि विबुधास्सच्चिदानन्दलीनाः
पुण्यापीना अजरममरं संश्रयं संश्रयन्ते ॥
यस्मात् पीत्वाऽसमशमसुधां तं जिनेन्द्र ! त्वदीयं
सारं वीरगमजलनिधिं सादरं साधु सेवे ॥१२॥
ये दुर्गाश्चोपसर्गा भवति कुमतिना सङ्गमे वा हतास्ते
तस्यापत् सङ्गमायाऽजनिषत तदनु ध्यानसन्धानहृष्टैः ॥
दैवैर्दिव्या समोदं तव शिरसि तदा पुष्पवृष्टिर्विचक्रे
आमूलालोलधूलीबहलपरिमलालीढलोलालिमाला ॥१३॥
शान्तं कान्तं नितान्तं निरुपमसुषमालाभवन्तं भवन्तं
दृष्ट्वा लीना स्वयं सा जिनवर! कमला चञ्चलापि स्वभावात् ।
विन्यस्ता शौरिणा या विधिसविधगता संस्थिता षट्पदाली
झङ्कारारावसाराऽमलदलकमलाऽऽगारभूमीनिवासे ॥१४॥
केचिद् गायन्ति देवाः प्रमदभरभृतो नाथ ! नृत्यन्ति केचित्
स्नाते जाते सुमेरौ त्वयि जनिसमये रत्नसिंहासनस्थे ॥
रम्यक्षौमावृताङ्गे मृदुतरचरणे भासुरस्फारमौलि-
च्छायासम्भारसारे वरकमलकरे तारहाराभिरामे ॥१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहाङ्कः सप्तहस्तप्रमिततनुरयं सम्पदः सर्वभव्याः
देया देया यदीयाननकमलभवा द्वादशाङ्गीमयाङ्गी ॥
दक्षो मोक्षोपयोगी वदति भगवतीं भारतीं नित्यमेवं
वाणीसन्दोहदेहे भवविरहवरं देहि मे देवि ! सारम् ॥१६॥
एवं देवाधिदेवः सदतिशयचयैः सर्वतः शोभमानः
काव्यैः 'संसारदावा' स्तुतिपदकलितैः कोविदैर्वर्ण्यमानः ॥
सद्ध्येयस्त्रैशलेयः स भवतु भविनां भूतये वर्धमानः
**ज्ञानाम्भःसागराभः** सकलसुखकरः श्रीजिनो वर्धमानः ॥१७॥

॥ इति महावीरस्तवनं पं. दानसारगणिना लिखितं सम्वत् १५६३ फाल्गुन शुदि १ ॥

★

श्रीज्ञानसागरसूरिविनिर्मितं

## 'आनन्दानम्र'.... पादपूर्त्तिरूपं श्रीशान्तिजिनस्तवनम् ।

### [ स्रग्धरावृत्तम् ]

चञ्चच्चामीकराभप्रवरवरतनुद्योतिरुद्योतिताशः
श्रीशान्तिः शान्तिदाता स भवतु भविनां भाविनां तीर्थनाथः ।
यत्पादौ सप्रसादौ जगति नतवतामुल्लसन्ति[?]प्रभुता(प्रभुत्व)-
मानन्दानम्रकम्रत्रिदशपतिशिरःस्फारकोटीरकोटी ॥१॥
नौमि श्रीविश्वसेनक्षितिपतितनयं विश्वविश्वाधिपं तं
शिश्राय श्रेयसी यं स्वयमपि सुकृतादर्जिता चक्रिलक्ष्मीः ॥
भक्तिप्राग्भारभारप्रणमदविकलाक्षोणिभृन्मौलिमोलि-
प्रेङ्खन्माणिक्यमालाशुचिरुचिलहरीधौतपादारविन्दम् ॥२॥
भोगान् रोगानिवाहो(हे)विषमिव विषयान् शस्त्रिकावद् वरस्त्रीः
प्रौढं तत्याज राज्यं रज इव रभसा दूषणानीव भूषाः ॥
वन्दध्वं मुक्तिरामाविलसनमनसं तं जनास्त्यागिनं भो !
आद्यं तीर्थाधिराजं भुवनभवभृतां कर्ममर्मापहारम् ॥३॥
भीतो हर्यक्षभीतो वनदवदरतस्त्यक्तरङ्गः कुरङ्गो
दीनो लीनो यदीये सुचरणशरणे निर्भयं प्राप सौख्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोभावन्तं भवन्तं तमिह जिनपते ! सर्वजीवानवन्तं
वन्दे शत्रुञ्जयाख्यक्षितिधरकमलाकण्ठशृङ्गारहारम् ॥४॥
सिद्धान्तास्ते त्वदीया अपरमत अहो वादिवादे कृतान्ताः
श्रीशान्ते ! भान्ति शान्ता मधुरतरसुधास्वादतः श्रान्तिकान्ताः ।
सिंहायन्ते धरायां नखरचितमहाडम्बराः स्फूर्जयन्तो
माद्यन्मोहद्विपेन्द्रस्फुटकरटतटीपाटने पाटवं ये[ते] ॥५॥
विद्वद्वृन्दैरमेयास्त्रिभुवनमखिलं लङ्घयन्तः स्वशक्त्या
दोषारीणामजेयाः सकलसुरनराधीश्वरैश्चापि गेयाः ॥
सन्दोहास्त्वद्गुणानां विकटसुभटवद् भेजिरे सज्जयित्वं
बिभ्राणाश्शौर्यसारा रुचिरतररुचां भूषणायोचितानाम् ॥६॥
प्रोद्यत्कैवल्यलक्ष्मीविपुलकुचतटस्फारशृङ्गारकाराः
साराः पीयूषधाराधरबहलगलद्बिन्दुवृन्दानुकाराः ॥
त्वद्व्याहाराः सुहारा इव गुणनिचिता लोकमुद्योतयन्ते
सद्वृत्तानां शुचीनां प्रकटनपटवो मौक्तिकानां फलानाम् ॥७॥
पूर्वं यैस्तत्क[त्यक्त]गर्वं भवशुभविधिना विश्वमान्या त्वदाज्ञा
भावाऽऽविर्भूतहर्षप्रकरपुलकितौ(तं)पालिताक्षालिताद्या(घा) ॥
मुक्तौ रागादिमुक्ता असमसुखरताः कर्मकुम्भिप्रभेदे
तेऽमी कण्ठीरवाभा जगति जिनवरा विश्ववन्द्या जयन्ति ॥८॥
भोगो रोगोऽपि तेषां भवनमिव वनं हव्यवाहोऽम्बुवाहो
पूतायन्ते च भूताः स्थलमिव सलिलं दुर्जनाः सज्जनाऽऽभाः ॥
जप्तो यैः कण्ठपीठे लुठित इव भवन्नामजापस्त्रिसन्ध्यं
सद्बोधाऽवन्ध्यबीजं सुगतिपथरथः श्रीसमाकृष्टिविद्या ॥९॥
तेषामेषा विशेषाद् विषयविषभवा वासना भासते वा ।
धत्ते चित्ते निवासं विषमतममहामोहमिथ्यात्ववासः ॥
धर्मः शर्मप्रदस्ते श्रवणपटयुगैर्न श्रुतो विश्रुतो यैः
रागद्वेषाहिमन्त्रः स्मरदवदवथुः प्रावृषेण्याम्बुवारः ॥१०॥
केचिच्चारित्ररत्नं कति लघु विरतिं त्वद्विहारेण लब्ध्वा
लोकास्तत्त्वावलोकाद् बहुसुकृतधराः सम्मदादेवमाहुः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्मादस्माद्दृशानामुपलसमधियां धर्मिताऽभूदकस्मा-
ज्जीयाज्जैनागमोऽयं निबिडतमतमःस्तोमतिग्मांशुबिम्बम् ॥११॥
निःशङ्का वीतपङ्का यदि हृदि भवतां सच्चिदानन्दवाञ्छा
विज्ञाः सज्ज्ञातदृष्ट्या परिहरि(र)त तदाऽनल्पसङ्कल्पजालम् ।
सेवध्वं देवदेवं जिनवरमचिरानन्दनं सर्वदा यो
द्वीपः संसारसिन्धौ त्रिभुवनभवनज्ञेयवस्तुप्रदीपः ॥१२॥
सोऽपि स्वामिन् ! स्वभावात् सकृदपि भवतः पूजयन् पादपद्मं
प्राज्यं प्राप्नोति राज्यं निरुपमकमलां निर्मलां चाप(पि) कीर्त्तिम् ॥
विप्रो वा क्षत्रियो वा वणिगपि घटकृल्लोहकारोऽपि यद् वा
यः पूर्वं तन्तुवायः कृतसुकृतलवैर्दूरितः पूरितोऽघैः ॥१३॥
आरूढो रूपलक्ष्मीं गुणततिषु तथा प्रौढिमानं भवान् भोः !
पूर्वं प्रौढं त्रिलोकी-परिवृढ ! सुदृढं तीर्थकृत्कर्मबन्धात् ।
नृणां स्त्रीणां सुराणां नयनपथि यथा विंशतिस्थानकादि-
प्रत्याख्यानप्रभावादमरमृगदृशामातिथेयं प्रपेदे ॥१४॥
दुर्गं दुष्टोपसर्गं विदलयति सतामार्हतानां समूलं ।
लक्ष्मीमुख्यं च सौख्यं रचयति रुचिरं स्वीयचित्तानुकूलम् ॥
निर्वाणी यक्षिणीयं गरुड इति सुरः शासने ते मुनीनां
सेवाहेवाकशाली प्रथमजिनपदाम्भोजयोस्तीर्थरक्षः ॥१५॥
रङ्गद्गौराङ्गकान्तिर्विशदवृषगतिर्निष्कलङ्कं मृगाङ्कं
धत्ते नित्यं भवानीहितकरणरतो ब्रह्मचारिश्रितो यः ॥
सर्वज्ञः शान्तिनाथः प्रबलबहुलसद्दर्पकन्दर्पघाते
दक्षः श्रीयक्षराजः स भवतु भवतां विघ्नमर्दी कपर्दी ॥१६॥
एवं **श्रीज्ञानसिन्धु**प्रसरशशधरः सद्गुणौघैः गभीर-
श्चत्वारिंशत्सुचापप्रमिततनुविभाभासुरो विश्वमित्रम् ।
श्रीशान्ते ! पीतकान्ते त्रिजगदभिमते चारुचिन्तामणिस्त्वं
ख्यातः शुद्धावदातः स्तुत इह मयका सम्पदां सद्म जीयाः ॥१७॥

इति श्रीशान्तिनाथस्तवनम् ।

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अवचूरि ( १ ) - रघुवंशसमस्यास्तोत्रस्यादिमस्य

1 'अथ' इति स्तोत्रस्यारम्भे मङ्गलार्थमव्ययम् । 2 निष्पादकम् । 3 सुखस्य । 4 स्निग्धगम्भीरनिर्घोषं यथा स्यात् तथा इति क्रियाविशेषणं भक्ति प्रागल्भ्यवशादुत्कृष्टतासूचकम् ॥१॥

5 'अथः' इति कर्तृविशेषणं, "थो मिथ्यावाचके श्रान्ते शोके च [(ऽथा]ऽरब्धवस्तुनि". [विश्वशम्भुकृतैकाक्षरनाममालिका ६४] इत्याद्येकाक्षराभिधानवाक्यात्, 'अथः सूनृतवाक्, एतेन धर्मित्वोक्तिः, अश्रान्तः इति पूजापरत्वोक्तिः, अशोकः इति हर्षोत्कर्षोक्तिः । एवं हि पूजा विधीयमाना। बहुफला भवति। 6 प्रजानामधिपः कुटम्बवान् पुत्र-पौत्रादिपरिकरपरिवृतः नृपतिरपि वा । 7 एकातपत्रमिति भूपतिपक्षे स्वल्पराज्यो राजा बहु राज्यं प्राप्नोति, अन्यत्र तीर्थकृच्चक्रिपदवीम् ॥२॥

8 इक्ष्वाकुवंशस्य सन्ततेरत्रोत्पन्नत्वाद् हेतुभूतम् । 9 क्रमेणाधिकतरम् ॥३॥ 10 स्तुतियोग्यं, । 11 अर्थमुक्ताभिः । 12 तीर्थकृत्त्वमाप्नोति इत्यर्थः ॥४॥

13 त्रिकरणशुद्ध्या । 14 अर्थिप्राप्यं, कृपणस्य हि धनमर्थिनामप्राप्यं भवति, भगवदुपास्तिप्राप्तं धनं सत्पात्रसुप्राप्यं भवति । 15 पृक्तं धनं [अभिधान चिंतामणो" देवकाण्ड 192 तेम पद्ये 'पृक्थं' अस्ति] ॥५॥

16 परार्ध्याः प्रकृष्टः वर्णा गुणा यशो वा येषां [वर्णाः... गुणे ॥ यशस्ताल० हैम. अनेकार्थसङ्ग्रह 154] । 17 संसाराम्भोधितरणार्थं प्राप्तं । 18 धर्मानुष्ठानपराङ्मुखः, त्वदुपास्तिरहितः ॥६॥

19 मङ्गलोपचारकलितम् ॥७॥

20 मोक्षपदप्राप्त्यर्थम् । 21 भूत-भावि-भावावबोधिनो महर्षयः, "पुरा-पूर्व-भविष्यार्थयोः" [-] इत्युक्तत्वात् । 22 भोगैकरतत्वात् तदायत्तः ॥८॥

23 प्रोवाच इति हे प्रोव ! हे अच ! प्रकर्षेण उः रक्षकः [रक्षार्थ वाचकावेतौ... वि-का ११]वो वदनं [-]यस्य सः प्रोवः, तस्य सम्बोधनम् - हे प्रोव ! । 24 अः चन्द्रः, चः चारुदर्शनः [तस्य सम्बोधनं] हे अच ! । 25 कौशलाः देशाः, तेषां पतयो राजानः, तेषां प्रथमः, "पढमराए व" [ ] इत्युक्तेः ॥९॥

26 अनूना-पूर्णा ऋद्धिर्यस्य स अनूनर्द्धिः, तस्य सम्बोधनम् । 27 ज्ञानदर्शनचारित्रलक्षणानि ॥१०॥

28 सुगन्धि रुधिरं कुङ्कुमं, चन्दनं श्रीखण्डः, ताभ्यां चर्चिताम् । 29

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे कमललोचन ! ॥११॥

30 श्रावण-भाद्रपदयोः ॥१२॥

31 परिचर्यापरायणा हरयो देवेन्द्रा धनिनश्च यस्य सः, तस्य सम्बोधनम्।

32 हे सुकृतिनां श्रेयोऽर्पणे दत्तहस्तः [इत्यन्वयः]। 33 नु इति वितर्के तुभ्यं प्रणम्य परमन्यं कञ्चिदपि देवं अहं न भजामि ॥१३॥

34 पूर्वोपार्जितदुःकर्मारिजृम्भितम् । 35 कृतः शीतस्य अपरित्यागो येन सः तत्परीषहसहत्वात् ॥१४॥

36 परार्ध्या प्रकृष्टा प्रतिमा आकृतिर्यस्य[सः, तस्य सम्बोधनम्] । 37 हे अगृह ! अनगार ! हे अय ! "योऽतिकुत्सने [योऽतिकुसिते-इति विश्व. नाममाला ९८] इत्यनेकार्थवचनात् । 38 वाजिशाला ॥१५॥

39 स्तुतिमाहात्म्यात् । 40 मोक्षसुखम् ॥१९॥

41 युगादिजिनवर्णनेन वर्ण्या वर्णनीया वर्णा अक्षराणि यत्र ॥२०॥

★

## अवचूरि : ( 2 ) रघुवंशसमस्यास्तोत्रस्य द्वितीयस्य

1 परलोकेषु केन पुण्येन सुखं भवतीति विचार्य ॥२॥ 2 भीमानि मितां स्तोकां (?) करोतीति भीमः भयविनाशकः इत्यर्थः, तस्य सम्बोधनं हे भीम !। 3 हे नृप !। 4 [गुणैरिति] "औदार्यं समता कान्तिः" [वाग्भट्टालङ्कार. ३.२] इत्यादिभिः दशभिः काव्यगुणैस्तनुवाग्विभवोऽपि सन् । 5 आत्मनः कर्माणि सांसारिका व्यापाराः, तत्करणे समर्थाम् ॥३॥। 7 हे जिन ! तव नामवाक् 'श्रीवीतराग' इत्येवंरूपा । 7 अर्थप्रतिपत्तये अभिमतार्थसिद्धये भवेत् चेत्, तर्हि तव मन्त्रैः अलं पूर्यताम्, कीदृशैः? साधयितुमशक्यैः । 8 मन्त्रं धर्मविचारं करोति इति, तस्य ॥४॥ 9 [इज्या]"यज देवपूजासङ्गतिकरण-दानेषु" [—] इति वचनात्, देवपूजादिभिः सुकृतैर्विशुद्धः आत्मा यस्य सः । 10 केवलावबोधात् । 11 तरितुमशक्यं संसारसागरमित्यर्थाद् ज्ञेयम् ॥५॥ 12 आसमुद्रक्षितीशां चक्रिप्रमुखाणां, मनीषिणां बुद्धिमतां महर्षीणां माननीयः । 13 समीपवर्तिनीं मुक्तिं ॥६॥

14 हे सोहम ! सह ऊहेन मया च वर्त्तते इति - [स+ऊह+म]सोहमः तत्सम्बोधनं । ऊहो दोषपरिज्ञानं, मा लक्ष्मीः शोभा, [मा मातरि तथा लक्ष्म्यां सुधाकलश-एकाक्षरनाममाला ३५] 15 काले वाद्र्धु[र्ध]क्यादौ प्रबोधो ज्ञानं येषां ते । 16 जन्मप्रभृति निर्दोषाणां [सत्त्वानां इति शेषः] । 17 त्वं गम्योऽसि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

18 ज्ञानेन केवलावबोधेन भास्कर इव भास्करः । 19 यथा काले सूर्योदयसमये विकाशवतां पद्मानां भास्करो गम्यो भवति । [तथा] ॥७॥

20 सर्वेभ्यः विद्वद्भ्योऽधिकं बुद्धिबलं न्यायो वा प्रेम [–] ॥८॥ 21 'नहि' इत्येकमव्ययं निषेधवाचकं [ ] ॥९॥

22 दे[व]! तव भक्तिः कल्याणकारिणी, सतां मनसि समागता सती परत्रेह च लोके सुखाय भवति ॥१०॥ 23 'ता लक्ष्मीः शोभा वा, [ता श्रियाम् – सुधा कलश–माला २३] ॥११॥ 24 अस्य / आः / त्वं / इति पदच्छेदः, आः इति अव्ययं, सन्तापप्रकोपसूचकं, जीवं प्रति सन्तापप्रकोपपूर्वकं वक्ति [आः सन्तापेऽव्यये कुध्या.... सुधाकलश–माला ३] ॥१३॥

★

## भक्तामरपादपूर्तिस्तोत्रटिप्पण

1. 'भूधातोः प्रथमगणस्य परस्मैपदिनः वर्तमानायां तृतीयपुरुषस्य द्विवचनस्य रूपम् ।

2. 'अङ्ग' इति कोमलामन्त्रणेऽव्ययम्

3. पिता । 4 'अस्य' इति नाम्नः । 5 स्वाधीनं सौधरसेण पीयूषरसेण सारं श्रेष्ठं सरः यस्य स–इति विग्रहः कार्यः । 6 चर्मचक्षुषां छद्मस्थानाम् इति यावत् । 7 'ते' इति कोविदाः । 8 'ततः' इति तेभ्यो दीपेभ्यः । 7 'कुमुदं' इति शशिविकसि जलजं, अथ च कौ पृथिव्यां मुद् हर्षः इति कुमुद्, तां इति द्वितीयोऽर्थोप्यूह्यः । 10 पद्मानां आलिका श्रेणिः तां, अथवा पदस्य मालिका पद्मालिका, तां पदपदवीम् इत्यर्थः । 11 तमः अज्ञानं, तस्य ग्रहः ग्रहणं बन्धनम् अज्ञानबन्धनं इत्यर्थः, अथ वा तमो राहुः [''तमो राहुः सैंहिकेयो''... इति अभिधान चिन्तामणि–देवकाण्डे १२१] तस्य ग्रहः, यः पर्वणि जायते सः, तस्य ॥

12. 'विधन्'–विधत् विधाने [हैमधातुपाठे १३७२ तमस्य]धातोः वर्तमानकृदन्तस्य शतृप्रत्ययान्तस्य पुंलिङ्गे प्रथमाया एकवचनरूपम् । 13 'ऋते' इति 'विनाऽर्थकमव्ययम् । 14 'आख्यः' इति आपूर्वकस्य 'ख्यांक्' अदादेर्धातोरद्यतनभूतकालस्य द्वितीयपुरुषैकवचनरूपम् । 15 'त्रिशक्तिः' इति गजाश्वपदातिरूपा नृपाणां तिस्रः शक्तयो भवन्ति ।

★ ठे. २०३, B. एकता एवन्यू, बेरेज रोड,
वासणा, अमदावाद-७

Jain Education International For Private & Personal Use Only www.jainelibrary.org